**RAMAKRISHNA MISSION VIDYAMANDIRA**
**(Residential Autonomous College affiliated to University of Calcutta)**
**SECOND YEAR [2014-17]**
**B.A./B.Sc. THIRD SEMESTER (July – December) 2015**
**Mid-Semester Examination, September 2015**
**SANSKRIT (Honours)**

Date : 14/09/2015
Time : 11 am – 1 pm
Paper : III
Full Marks : 50

1. **सलक्षणोदाहरणमलंकारद्वयं व्याख्येयम्।** [2×5]
   (क) उपमा। (ख) रूपकम्। (ग) यमकम्। (घ) निश्चयः।

2. **उदाहृतपद्येषु द्वयोरलंकारा निर्णेयास्तत्तल्लक्षणानि च लेख्यानि।** [2×5]
   क) असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः।
   अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः॥
   ख) नेदं नभोमण्डलमम्बुराशि-
   र्नैताश्च तारा नवफेनभङ्गाः।
   नायं शशी कुण्डलितः फणीन्द्रो
   नासौ कलङ्कः शयितो मुरारिः॥
   ग) गगनं गगनाकारं सागरः सागरोपमः।
   रामरावणयोर्युद्धं रामरावणयोरिव॥
   घ) अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा।

3. विश्वनाथकविराजकृतं महाकाव्यलक्षणमुल्लिख्य तत्सङ्गतिः कुत्रचित् स्थले प्रदर्शनीया। [10]

   **अथवा**

   साहित्यदर्पणानुसारं नान्दीसामान्यलक्षणं नान्दीप्रकारांश्चालोच्य शाकुन्तले सा कीदृशीति यथायुक्ति वक्तव्यम्।

4. संस्कृतभाषानिबद्धानामायुर्वेदशास्त्राणां परिचयः प्रदेयः। [10]

5. यजुर्वेदविषयाः समासेनालोचनीयाः। [10]

   **अथवा**

   सामवेदविषया उपस्थापनीयाः संक्षेपेण।

   **अथवा**

   **दशैव** प्रश्नाः समाधेयाः। [10 × 1]
   क) गोपथब्राह्मणं केन वेदेन सम्बद्धम्?
   ख) वेदपुरुषस्य मुखस्थानीयं भवति किं तावद् वेदाङ्गम्?
   ग) ऋग्वेदे साकल्येन कति मण्डलानि सन्ति?
   घ) विश्वामित्र-नदी-संवादसूक्तम् ऋग्वेदस्य कस्मिन् मण्डल उपलभ्यते?
   ङ) उद्गाता कस्य वेदस्य पुरोहितः?
   च) ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तस्य का तावद् देवता?
   छ) "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति कस्य वचनम्?
   ज) ऋग्वेदस्य पञ्चममण्डलस्य ऋषिः कः?
   झ) जगत्यां साकल्येनाक्षराणि कति?
   ञ) महाभाष्यानुसारं सामवेदशाखाः कति?

———— × ————